# NCERT Solutions Class 7 Sanskrit (Deepakam)

## Chapter 6 क्रीडाम वयं श्लोकान्त्याक्षरीम्

**१. अधः प्रदत्तानां प्रश्नानाम् एकेन पदेन उत्तरं लिखन्तु ।**

**(नीचे दिए गए प्रश्नों के उत्तर एक पद में दीजिए।)**

(क) विद्याहीनाः कीदृशाः किंशुकाः इव न शोभन्ते ?
(ख) धीमतां कालः कथं गच्छति ?
(ग) केषां कालः निद्रया कलहेन वा गच्छति ?
(घ) खलस्य विद्या किमर्थम् ?
(ङ) सज्जनस्य विद्या किमर्थम् ?
(च) चन्द्रः केषां भूषणम् अस्ति ?
(छ) सर्वधनप्रधानं किम् ?

**उत्तर:** (क) निर्गन्धाः
(ख) काव्यशास्त्रविनोदेन
(ग) मूर्खाणां
(घ) विवादाय
(च) ताराणाम्
(छ) विद्या
(ङ) ज्ञानाय

**२. अद्यः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखन्तु ।**

**(नीचे दिए गए प्रश्नों के उत्तर पूर्ण वाक्य में दीजिए।)**

(क) निर्गन्धाः किंशुकाः इव के न शोभन्ते ?
(ख) मूर्खाणां कालः कथं गच्छति?
(ग) दुर्जन: विद्यायाः धनस्य शक्तेः च उपयोगं कथं करोति?
(घ) कीदृशाः मनुष्याः भुवि भारभूताः भवन्ति ?
(ङ) शनैः शनैः कानि साधनीयानि ?

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**उत्तर:** (क) निर्गन्धाः किंशुकाः इव विद्याहीनाः न शोभन्ते ।

(ख) मूर्खाणां कालः निद्रया कलहेन वा गच्छति।

(ग) दुर्जनः विद्यायाः उपयोगं कलहार्थं करोति, धनस्य उपयोगं अहङ्कारार्थं करोति शक्तेः च उपयोगम् अन्येषां पीडनार्थं च करोति ।

(घ) ये जनाः विद्यां न अर्जयन्ति कठिनव्रतं न आचरन्ति, दानं न कुर्वन्ति ज्ञानं न अर्जयन्ति, सम्यक् न आचरन्ति, गुणवन्तः न सन्ति धर्माचरणं न कुर्वन्ति, ते अस्यां भूमौ भारभूताः भवन्ति ।

(ङ) पन्थाः शनैः, कन्था शनैः पर्वत लङ्घनं शनैः, विद्या शनैः, वित्तं शनैः च एतानि पञ्च कार्याणि शनैः-शनैः
साधनीयानि ।

## ३. उचितान् वाक्यांशान् परस्परं संयोजयन्तु ।

**(उचित वाक्यांशों को आपस में जोड़िए ।)**

| (क) | (ख) |
|---|---|
| तदा वृत्तिश्च कीर्तिश्च | पञ्चैतानि शनैः शनैः |
| खलस्य साधोर्विपरीतमेतत् | निर्गन्धा इव किंशुकाः |
| शनैर्विद्या शनैर्वित्तं | यदा विद्या भवेत्तव |
| विद्याहीना न शोभन्ते | न भातृभाज्यं न च भारकारि |
| न चोरहार्यं न च राजहार्यम् | ज्ञानाय दानाय च रक्षणाय |
| विद्या राजसु पूज्यते | विद्याभ्यासं समाचरेत् |
| अतो धर्मार्थमोक्षेभ्यः | न हि धनम् |

**उत्तर:**

| | (क) | | (ख) |
|---|---|---|---|
| यथा– | तदा वृत्तिश्च कीर्तिश्च | ↔ | यदा विद्या भवेत्तव |
| (क) | खलस्य साधोर्विपरीतमेतत् | ↔ | ज्ञानाय दानाय च रक्षणाय |
| (ख) | शनैर्विद्या शनैर्वित्तं | ↔ | पञ्चैतानि शनैः शनैः |
| (ग) | विद्याहीना न शोभन्ते | ↔ | निर्गन्धा इव किंशुकाः |
| (घ) | न चोरहार्यं न च राजहार्यम् | ↔ | न भातृभाज्यं न च भारकारि |
| (ङ) | विद्या राजसु पूज्यते | ↔ | न हि धनम् |
| (च) | अतो धर्मार्थमोक्षेभ्यः | ↔ | विद्याभ्यासं समाचरेत् |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

## ४. उदाहरणानुसारम् अधः रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुर्वन्तु

**(उदाहरण के अनुसार नीचे रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए।)**

| | | |
|---|---|---|
| (क) राजा पृथिव्याः भूषणं भवति। | – | राजा कस्याः भूषणं भवति? |
| (ख) साधोः विद्या ज्ञानाय भवति। | – | .................... विद्या ज्ञानाय भवति? |
| (ग) विद्या गुरूणां गुरुः। | – | विद्या .................... गुरुः? |
| (घ) ते मर्त्यलोके भुवि भारभूताः भवन्ति। | – | ते मर्त्यलोके भुवि .................... भवन्ति? |
| (ङ) विद्याहीनाः न शोभन्ते। | – | .................... न शोभन्ते? |
| (च) सर्वस्य लोचनं शास्त्रम्। | – | सर्वस्य लोचनं ....................? |
| (छ) विद्या राजसु पूज्यते। | – | .................... राजसु पूज्यते? |
| (ज) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्। | – | .................... धीमतां कालो गच्छति? |

**(क) राजा पृथिव्याः भूषणं भवति ।**
**प्रश्न- राजा कस्याः भूषणं भवति ?**

(ख) साधोः विद्या ज्ञानाय भवति ।
(ग) विद्या गुरूणां गुरुः ।
(घ) ते मर्त्यलोके भुवि भारभूताः भवन्ति ।
(ङ) विद्याहीनाः न शोभन्ते ।
(च) सर्वस्य लोचनं शास्त्रम् ।
(छ) विद्या राजसु पूज्यते ।
(ज) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।

**उत्तर:** (ख) कस्य विद्या ज्ञानाय भवति ?

(ग) विद्या केषां गुरु
(घ) ते मर्त्यलोके के भवन्ति ?
(ङ) कीदृशाः न शोभन्ते ?
(च) सर्वस्य लोचनं किम् ?
(ज) का राजसु पूज्यते ?
(ज) केन धीमतां कालो गच्छति ?

Get More Learning Materials Here : CLICK HERE www.studentbro.in

## ५. मञ्जूषातः समुचितानि पदानि स्वीकृत्य रिक्तस्थानानि पूरयन्तु।

### (मञ्जूषा के समुचित पदों से रिक्त स्थान भरिए।)

रक्षणाय, मदाय, विवादाय, परिपीडनाय, ज्ञानाय, दानाय

| सज्जनस्य | | दुर्जनस्य | |
|---|---|---|---|
| शक्तिः | ................ | शक्तिः | ................ |
| विद्या | ................ | विद्या | ................ |
| धनम् | ................ | धनम् | ................ |

### उत्तर:

| | | | |
|---|---|---|---|
| शक्तिः | रक्षणाय | शक्तिः | परिपीडनाय |
| विद्या | ज्ञानाय | विद्या | विवादाय |
| धनम् | दानाय | धनम् | मदाय |

## ६. उदाहरणानुसारम् अधोलिखितानां पदानां विभक्तिं वचनं च लिखन्तु।

### (उदाहरणानुसार नीचे लिखे पदों की विभक्ति और वचन लिखिए।)

| | | | |
|---|---|---|---|
| यथा – ताराणाम् | – | षष्ठी विभक्तिः | बहुवचनम् |
| (क) विद्याम् | – | ................ | ................ |
| (ख) धनस्य | – | ................ | ................ |
| (ग) कलहेन | – | ................ | ................ |
| (घ) नराणाम् | – | ................ | ................ |
| (ङ) मर्त्यलोके | – | ................ | ................ |
| (च) ज्ञानाय | – | ................ | ................ |
| (छ) राजसु | – | ................ | ................ |

### उत्तर:

| | | | |
|---|---|---|---|
| (क) | विद्याम् | द्वितीया विभक्तिः | एकवचनम् |
| (ख) | धनस्य | षष्ठी विभक्तिः | एकवचनम् |
| (ग) | कलहेन | तृतीया विभक्तिः | एकवचनम् |
| (घ) | नराणाम् | षष्ठी विभक्तिः | बहुवचनम् |
| (ङ) | मर्त्यलोके | सप्तमी विभक्तिः | एकवचनम् |
| (च) | ज्ञानाय | चतुर्थी विभक्तिः | एकवचनम् |
| (छ) | राजसु | सप्तमी विभक्तिः | बहुवचनम् |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**प्रश्न 1. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

**(निम्नलिखित पद्यांशों को पढ़कर प्रश्नों के उत्तर लिखिए ।)**

**(क) रूपयौवनसम्पन्ना विशालकुलसम्भवाः । विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥**

**I. एकपदेन उत्तरत।**

**(i) कीदृशाः पुत्राः न शोभन्ते ?**
**उत्तरः** विद्याहीनाः

**(ii) किंशुकाः कीदृशाः भवन्ति ?**
**उत्तरः** निर्गन्धाः

**II. पूर्णवाक्येन उत्तरत ।**

**(i) विशालकुलसम्भवाऽपि कीदृशाः पुत्राः न शोभन्ते ?**
**उत्तरः** विशालकुलसम्भवाऽपि विद्याहीनाः पुत्राः न शोभन्ते।

**(ii) रूपयौवन-सम्पन्नाऽपि कीदृशाः न शोभन्ते ?**
**उत्तरः** रूपयौवनसम्पन्नाऽपि विद्याहीनाः न शोभन्ते ।

**III. भाषिककार्यम्।**

**(i) 'विशालकुलसम्भवाः' अत्र विशेषणपदं किं प्रयुक्तम् ?**
(क) विशालः
(ख) कुलः
(ग) सम्भवः
**उत्तरः** (क) विशालः

**(ii) 'गन्धरहिताः' इति पदस्य समानपदं किं प्रयुक्तम् ?**
(क) किंशुकाः
(ग) रहिताः

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ख) निर्गन्धाः

**उत्तरः** (ख) निर्गन्धाः

**(iii) 'विद्याहीनाः न शोभन्ते' अस्मिन् वाक्ये क्रियापदं किं आगतम् ?**

(क) शोभन्ते

(ख) न

(ग) विद्याहीनाः

**उत्तरः** (क) शोभन्ते

**(ख) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥**

**I. एकपदेन उत्तरत।**

**(i) केषां समयः काव्यशास्त्र विनोदेन गच्छति ?**

**उत्तरः** धीमताम्

**(ii) केषां समयः व्यसनेन गच्छति ?**

**उत्तरः** मूर्खाणाम्

**II. पूर्णवाक्येन उत्तरत ।**

**(i) निद्रया कलहेन वा केषां कालो गच्छति ?**

**उत्तरः** निद्रया कलहेन वा मूर्खाणां समयः गच्छति ।

**(ii) धीमतां कालः कीदृशेन गच्छति ?**

**उत्तरः** धीमताम् कालः काव्यशास्त्रविनोदेन गच्छति।

**(iii) मूर्खाणां समयः 'कीदृशेन गच्छति ?**

**उत्तरः** मूर्खाणां समयः व्यसनेन, निद्रया कलहेन वा गच्छति।

**III. भाषिक कार्यम् ।**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(i) 'बुद्धिमताम्' इति पदस्य समानपदं किम् आगतम् ?**

(क) मूर्खाणां

(ख) धीमताम्

(ग) गच्छताम्

**उत्तरः** (ख) धीमताम्

**(ii) 'धीमताम्' इति पदस्य विपरीतं पदं किम् आगतम् ?**

(क) मूर्खाणां

(ख) कालः

(ग) काव्यशास्त्राणाम्

**उत्तरः** (क) मूर्खाणां

**(iii) 'मूर्खाणां समयः व्यसनेन गच्छति' अस्मिन् वाक्ये क्रियापदं किम् ?**

(क) व्यसनेन

(ख) गच्छति

(ग) मूर्खाणां

**उत्तरः** (ख) गच्छति

**(iv) " धीमतां काव्यशास्त्रविनोदेन कालः गच्छति।" अस्मिन् वाक्ये कर्तृपदं (कर्ता) कः अस्ति ?**

(क) कालः

(ख) काव्यशास्त्र

(ग) धीमताम्

**उत्तरः** (क) कालः

**(ग) विद्या विवादाय धनं मदाय**
**शक्तिः परेषां परिपीडनाय ।**
**खलस्य साधोर्विपरीतमेतत**
**ज्ञानाय दानाय च रक्षणाय ॥**

**I. एकपदेन उत्तरत।**

**(i) साधोः शक्तिः किमर्थं भवति ?**

**उत्तर:** रक्षणाय

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ii) कस्य धनं दानाय भवति ?**

**उत्तर:** साधोः

(iii) कस्य शक्तिः परेषां परिपीडनाय भवति ?

उत्तर: खलस्य

**II. पूर्णवाक्येन उत्तरत।**

**(i) कस्य विद्या ज्ञानाय भवति ?**

**उत्तर:** साधोः विद्या ज्ञानाय भवति।

**(ii) खलस्य धनं किमर्थं भवति ?**

**उत्तर:** खलस्य धनं मदाय भवति।

**(iii) कस्य विद्या विवादाय भवति ?**

**उत्तर:** खलस्य विद्या विवादाय भवति।

**III. भाषिककार्यम्।**

**(i) 'अभिमानाय' इति पदस्य पर्यायपदं श्लोके किं आगतम् ?**

(क) मदाय

(ख) ज्ञानाय

(ग) रक्षणाय

**उत्तर:** (क) मदाय

**(ii) 'सज्जनस्य' इति पदस्य अर्थे किं पदं आगतम् ?**

(क) खलस्य

(ख) साधोः

(ख) शक्तिः

**उत्तर:** (ख) साधोः

**(iii) 'दुष्टजनस्य' इति पदस्य अर्थे किं पदं आगतम् ?**

(क) दानस्य

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ख) साधोः

(ग) खलस्य

**उत्तर:** (ग) खलस्य

**(iv) 'रक्षणाय' इति पदस्य विपरीत पदं किं आगतम् ?**

(क) पीडनाय

(ख) मदाय

(ग) विवादाय

**उत्तर:** (क) पीडनाय

**(घ) येषां न विद्या न तपो न दानं**
**ज्ञानं न शीलं न गुणो न धर्मः ।**
**ते मर्त्यलोके भुवि भारभूता ।**
**मनुष्यरूपेण मृगाश्चरन्ति ॥**

**I. एकपदेन उत्तरत।**

**(i) गुणहीनाः जनाः कुत्र भारभूताः भ्रमन्ति ।**

**उत्तर:** मर्त्यलोके !

**(ii) मनुष्यरूपेण के चरन्ति ?**

**उत्तर:** मृगाः

**II. पूर्णवाक्येन उत्तरत ।**

**(i) मनुष्यरूपेण मृगाः इव के भ्रमन्ति ?**

**उत्तर:** येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति ।

**III. भाषिककार्यम्।**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(i) 'मनुष्यरूपेण मृगाश्चरन्ति' अत्र क्रियापदं किं अस्ति ?**

(क) मृगाः

(ख) मनुष्यरूपेण

(ग) चरन्ति

**उत्तर:** (ग) चरन्ति

**(ii) 'पशवः' इति पदस्य समानपदं किं प्रयुक्तम् ?**

(क) मृगाः

(ख) तपः

(ग) धर्मः

**उत्तर:** (क) मृगाः

**(iii) 'येषां' पदं कस्मै प्रयुक्तम् ?**

(क) मनुष्याय

(ख) धर्माय

(ग) ज्ञानाय

**उत्तर:** (क) मनुष्याय

**(iv) 'ते' पदं कस्मै प्रयुक्तम् ?**

(क) गुणाय

(ख) गुणहीनजनाय

(ग) धर्माय

**उत्तर:** (ख) गुणहीनजनाय

**(ङ) तदा वृत्तिश्च कीर्तिश्च लक्ष्मीर्वाणी यशस्विनी ।**
**तत्त्वज्ञानं परा शान्तिर्यदा विद्या भवेत्तव ॥**

**I. एकपदेन उत्तरत।**

**(i) वाणी यशस्विनी कथं भवेत्**

**उत्तर:** विद्या अर्जनेन

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ii) पराशान्ति कदा भवेत् ?**

**उत्तर:** विद्या अर्जनेन

**II. पूर्णवाक्येन उत्तरत।**

**(i) विद्या ज्ञानेन किं किं भवति ?**

**उत्तर:** विद्या ज्ञानेन वृत्तिः कीर्तिः, लक्ष्मीः, यशस्विनीवाणी, तत्त्वज्ञानं, पराशान्तिः, भवति।

**(ii) त्वया निरन्तरं किं करणीयम् ?**

**उत्तर:** त्वया निरन्तरं विद्यार्जनं करणीयम् ।

**III. भाषिककार्यम् ।**

**(i) 'अपकीर्तिः इति' पदस्य विपर्ययपदं किं आगतम् ?**

(क) कीर्तिः

(ख) वाणी:

(ग) वृत्ति:

**उत्तर:** (क) कीर्तिः

**(ii) 'वास्तविकं ज्ञानं' इति पदस्य समानपदं किं आगतम्?**

(क) पराज्ञानं

(ख) तत्वज्ञानं

(ख) कीर्तिज्ञानं

**उत्तर:** (ख) तत्वज्ञानं

**(iii) 'तदा' इति पदस्य विपर्ययपदं किं आगतम् ?**

(क) परा

(ख) तदा

(ग) यदा

**उत्तर:** (ग) यदा

**(iv) अस्मिन् श्लोके क्रियापदं किं आगतम् ?**

(क) तव

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ख) भवेत्

(ग) वाणी

**उत्तर:** (ख) भवेत्

**(च) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**
**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।**
**विद्या बन्धुजनो विदेशगमने विद्या परा देवता**
**विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥**

**I. एकपदेन उत्तरत।**

**(i) नरस्य रूपम् किं अस्ति?**

**उत्तर:** विद्या

**(ii) विद्या कीदृशं धनं अस्ति ?**

**उत्तर:** प्रच्छन्नगुप्तं

**(iii) विद्या केषाम् गुरूः अस्ति ?**

**उत्तर:** गुरूणाम्

**(iv) कः पशुः भवति ?**

**उत्तर:** विद्याविहीनः

**II. पूर्णवाक्येन उत्तरत।**

**(i) विद्या कीदृशी अस्ति?**

**उत्तर:** विद्या भोगकरी यशः सुखकारी च अस्ति ।

**(ii) विद्या कुत्र पूज्यते किं च न?**

**उत्तर:** विद्या राजसु पूज्यते धनं च न।

**(iii) विदेशगमने विद्या कीदृशः भवति ?**

**उत्तर:** विदेशगमने विद्या बन्धुजनः भवति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**III. भाषिककार्यम् ।**

**(i) विद्याशब्दस्य प्रयोगं कतिवारं अभवत्?**

(क) पञ्चवारं

(ख) सप्तवारं

(ग) अष्टवारं

**उत्तर:** (ख) सप्तवारं

**(ii) 'विद्यारहित:' इति अर्थे किं समानपदं आगतम् ?**

(क) विद्याविहीन:

(ख) विद्यासहित:

(ग) विद्यामयः

**उत्तर:** (क) विद्याविहीन:

**(iii) 'विद्याराजसु पूज्यते' अत्र क्रियापदं किं अस्ति?**

(क) विद्या

(ख) राजसु

(ग) पूज्यते

**उत्तर:** (ग) पूज्यते

**(iv) 'विद्या गुरूणां गुरुः' अस्मिन् वाक्ये कर्तृपदं ?**

(क) विद्या

(ख) गुरूणां

(ग) गुरु:

**उत्तर:** (क) विद्या

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**प्रश्न 2. रेखांकितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**
**(रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए ।)**

(क) मूर्खाणां निद्रया कलहेन वा कालः गच्छति।
(ख) खलस्य धनं मदाय भवति ।
(ग) दुर्जनस्य शक्तिः परेषां परिपीडनाय भवति ।
(घ) सज्जनस्य शक्तिः रक्षणाय भवति ।
(ङ) ते मर्त्यलोके भुवि भारभूताः सन्ति ।
(च) विद्या राजसु पूज्यते ।
(छ) सर्वदा विद्याभ्यासं समाचरेत् ।
(ज) राजा पृथिव्याः भूषणं अस्ति ।

**उत्तर:** (क) केषां निद्रया कलहेन वा कालः गच्छति ?
(ख) कस्य धनं मदाय भवति ?
(ग) शक्ति केषां परिपीडनाय भवति ?
(घ) सज्जनस्य शक्तिः किमर्थं भवति ?
(ङ) ते मर्त्यलोके कुत्र भारभूताः सन्ति ?
(च) विद्या कुत्र पूज्यते ?
(छ) सर्वदा किं समाचरेत् ?
(ज) कः पृथिव्याः भूषणं अस्ति?

**प्रश्न 3.**
**अधोलिखितशब्दानां पर्यायद्वयं प्रदत्तशब्देषु चित्वा लिखत।**
**(नीचे लिखे शब्दों के दो पर्यायपद दिए गए शब्दों से चुनकर लिखिए।)**

(क) राजा = नृपः, भूपतिः, सुरपतिः
(ख) चन्द्रः = हिमकरः, दिवाकरः, निशापतिः
(ग) सुमनम् = प्रसूनम्, पुष्पम्, स्रजम्
(घ) पृथ्वी = धरा, भू, अचल
(ङ) विद्या = ज्ञानम्, बुद्धिः, लक्ष्मी
(च) पर्वतः = शैलः, भूधर, वसुधा
(छ) कीर्ति = यशः, प्रसिद्धिः, अमरभाषा
(ज) संस्कृतम् = देवभाषाः, आर्यभाषाः, ख्यातिः

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**उत्तर:** (क) नृपः, भूपतिः
(ख) हिमकरः, निशापति
(ग) प्रसूनम्, पुष्पम्
(घ) धरा, भू
(ङ) ज्ञान, बुद्धि
(च) शैल, भूधर
(छ) यश, प्रसिद्धि
(ज) देवभाषा, आर्यभाषा

**प्रश्न 4. अधोलिखितानां शब्दानां पुरतः उचितं विलोमशब्द कोष्ठकात् चित्वा लिखत।**

**(निम्नलिखित शब्दों के सामने उचित विलोम शब्द कोष्ठक से चुनकर लिखिए।)**

| | पदम् | | विलोमपदम् |
|---|---|---|---|
| (क) | निर्गन्धा | – | ................................... (गन्धहीन/सुगन्धा/गन्धरहिता) |
| (ख) | शोभन्ते | – | ................................... (अशोभते/सुशोभित/अशोभन्ते) |
| (ग) | मूर्खाणाम् | – | ................................... (धीमताम्/बुद्धिमन्त/मूर्खाः) |
| (घ) | शनैः | – | ................................... (तीव्रम्/धीरतया/धीरज) |
| (ङ) | पीडनाय | – | ................................... (रक्षणाय/पीडन/रक्षा) |
| (च) | विद्याविहीनः | – | ................................... (बुद्धिमान/विद्यावान/विद्यारहितः) |
| (छ) | गुरुः | – | ................................... (शिष्यः/शिक्षकः/आचार्यः) |
| (ज) | सौख्यं | – | ................................... (सुखम्/दुःखम्/कल्याणम्) |
| (झ) | वर्धते | – | ................................... (क्षयति/वृद्धिम्/वृद्धिः) |

**उत्तर:** (क) सुगन्धा
(ख) अशोभन्ते
(ग) धीमताम्
(घ) तीव्रम्
(ङ) रक्षणाय
(च) विद्यावान
(छ) शिष्यः
(ज) दुःखम्
(झ) क्षयति

Get More Learning Materials Here : CLICK HERE www.studentbro.in